# .. shrIprahlAdakRitaM gaNeshastotram ..

# ॥ શ્રીગણેશસ્તોત્રં પ્રહ્લાદકૃતમ્ ॥

## Document Information

Text title : prahlAdakRitaM gaNeshastotra

File name : prahlAdakRitagaNeshastotra.itx

Location : doc_ganesha

Author : Prahlad

Language : Sanskrit

Subject : hinduism/religion

Transliterated by : Available at webdunia.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : source mudgalapurANa

Latest update : April 23, 2004

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીગણેશસ્તોત્રં પ્રહ્લાદકૃતમ્ ॥

શ્રી ગણેશાય નમઃ ।
અધુના શ્રૃણુ દેવસ્ય સાધનં યોગદં પરમ્ ।
સાધયિત્વા સ્વયં યોગી ભવિષ્યસિ ન સંશયઃ ॥ ૧॥

સ્વાનન્દઃ સ્વવિહારેણ સંયુક્તશ્ચ વિશેષતઃ ।
સર્વસંયોગકારિત્વાદ્ ગણેશો માયયા યુતઃ ॥ ૨॥

વિહારેણ વિહીનશ્ચાઽયોગો નિર્માયિકઃ સ્મૃતઃ ।
સંયોગાભેદ હીનત્વાદ્ ભવહા ગણનાયકઃ ॥ ૩ ॥

સંયોગાઽયોગયોર્યોગઃ પૂર્ણયોગસ્ત્વયોગિનઃ ।
પ્રહ્લાદ ગણનાથસ્તુ પૂર્ણો બ્રહ્મમયઃ પરઃ ॥ ૪॥

યોગેન તં ગણાધીશં પ્રાપ્નુવન્તશ્ચ દૈત્યપ ।
બુદ્ધિઃ સા પઞ્ચધા જાતા ચિત્તરૂપા સ્વભાવતઃ ॥ ૫॥

તસ્ય માયા દ્વિધા પ્રોક્તા પ્રાપ્નુવન્તીહ યોગિનઃ ।
તં વિદ્ધિ પૂર્ણભાવેન સંયોગાઽયોગર્વજિતઃ ॥ ૬॥

ક્ષિપ્તં મૂઢં ચ વિક્ષિપ્તમેકાગ્રં ચ નિરોધકમ્ ।
પઞ્ચધા ચિત્તવૃત્તિશ્ચ સા માયા ગણપસ્ય વૈ ॥ ૭॥

ક્ષિપ્તં મૂઢં ચ ચિત્તં ચ યત્કર્મણિ ચ વિકર્મણિ ।
સંસ્થિતં તેન વિશ્વં વૈ ચલતિ સ્વ-સ્વભાવતઃ ॥ ૮॥

અકર્મણિ ચ વિક્ષિપ્તં ચિત્તં જાનીહિ માનદ!।
તેન મોક્ષમવાપ્નોતિ શુક્લગત્યા ન સંશયઃ ॥ ૯॥

એકાગ્રમષ્ટધા ચિત્તં તદેવૈકાત્મધારકમ્ ।
સમ્પ્રજ્ઞાત સમાધિસ્થમ્ જાનીહિ સાધુસત્તમ ॥ ૧૦॥

નિરોધસંજ્ઞિતં ચિત્તં નિવૃત્તિરૂપધારકમ્ ।
અસમ્પ્રજ્ઞાતયોગસ્થં જાનીહિ યોગસેવયા ॥ ૧૧॥

સિદ્ધિર્નાનાવિધા પ્રોક્તા ભ્રાન્તિદા તત્ર સમ્મતા ।
માયા સા ગણનાથસ્ય ત્યક્તવ્યા યોગસેવયા ॥ ૧૨॥

પઞ્ચધા ચિત્તવૃત્તિશ્ચ બુદ્ધિરૂપા પ્રકીર્તિતા ।
સિદ્ધ્યર્થં સર્વલોકાશ્ચ ભ્રમયુક્તા ભવન્ત્યતઃ ॥ ૧૩॥

ધર્મા-ઽર્થ-કામ-મોક્ષાણાં સિદ્ધિર્ભિન્ના પ્રકીર્તિતા ।
બ્રહ્મભૂતકરી સિદ્ધિસ્ત્યક્તવ્યા પંચધા સદા ॥ ૧૪॥

મોહદા સિદ્ધિરત્યન્તમોહધારકતાં ગતા ।
બુદ્ધિશ્ચૈવ સ સર્વત્ર તાભ્યાં ખેલતિ વિઘ્નપઃ ॥ ૧૫॥

બુદ્ધ્યા યદ્ બુદ્ધ્યતે તત્ર પશ્ચાન્ મોહઃ પ્રવર્તતે ।
અતો ગણેશભક્ત્યા સ માયયા વર્જિતો ભવેત્ ॥ ૧૬॥

પઞ્ચધા ચિત્તવૃત્તિશ્ચ પઞ્ચધા સિદ્ધિમાદરાત્ ।
ત્યક્ત્વા ગણેશયોગેન ગણેશં ભજ ભાવતઃ ॥ ૧૭॥

તતઃ સ ગણરાજસ્ય મન્ત્રં તસ્મૈ દદૌ સ્વયમ્ ।
ગણાનાં ત્વેતિ વેદોક્તં સ વિધિં મુનિસત્તમ ॥ ૧૮॥

તેન સમ્પૂજિતો યોગી પ્રહ્લાદેન મહાત્મના ।
યયૌ ગૃત્સમદો દક્ષઃ સ્વર્ગલોકં વિહાયસા ॥ ૧૯॥

પ્રહ્લાદશ્ચ તથા સાધુઃ સાધયિત્વા વિશેષતઃ ।
યોગં યોગીન્દ્રમુખ્યં સ શાન્તિસદ્ધારકોઽભવત્ ॥ ૨૦॥

વિરોચનાય રાજ્યં સ દદૌ પુત્રાય દૈત્યપઃ ।
ગણેશભજને યોગી સ સક્તઃ સર્વદાઽભવત્ ॥ ૨૧॥

સગુણં વિષ્ણુ રૂપં ચ નિર્ગુણં બ્રહ્મવાચકમ્ ।
ગણેશેન ધૃતં સર્વં કલાંશેન ન સંશયઃ ॥ ૨૨॥

એવં જ્ઞાત્વા મહાયોગી પ્રહ્લાદોઽભેદમાશ્રિતઃ ।
હૃદિ ચિન્તામણિમ્ જ્ઞાત્વાઽભજદનન્યભાવનઃ ॥ ૨૩॥

સ્વલ્પકાલેન દૈત્યેન્દ્રઃ શાન્તિયોગપરાયણઃ ।
શાન્તિં પ્રાપ્તો ગણેશેનૈકભાવોઽભવતત્પરઃ ॥ ૨૪॥

શાપશ્ચૈવ ગણેશેન પ્રહ્લાદસ્ય નિરાકૃતઃ ।
ન પુનર્દુષ્ટસંગેન ભ્રાન્તોઽભૂન્મયિ માનદ!॥ ૨૫॥

એવં મદં પરિત્યજ હ્યેકદન્તસમાશ્રયાત્ ।
અસુરોઽપિ મહાયોગી પ્રહ્લાદઃ સ બભૂવ હ ॥ ૨૬॥

એતત્ પ્રહ્લાદમાહાત્મ્યં યઃ શૃણોતિ નરોત્તમઃ ।
પઠેદ્ વા તસ્ય સતતં ભવેદોપ્સિતદાયકમ્ ॥ ૨૭॥

॥ ઇતિ મુદ્ગલપુરાણોક્તં પ્રહ્લાદકૃતં ગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

.. shrIprahlAdakRitaM gaNeshastotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*